योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १८८

अष्टाशीत्यधिकशततमः सर्गः १८८

श्रीवसिष्ठ उवाच ।

आदिमत्त्वमिदं प्रोक्तमेतस्य कलनस्य यत् ।

परस्मादद्वितीयं तत्त्वद्बोधाय न वास्तवम् ।। १

एवंविधं तत्कलनमात्मनोऽङ्गमकृत्रिमम् ।

चेत्योन्मुखचिदाभासं जीवशब्देन कथ्यते ।। २

कलनस्यास्य नामानि बहूनि रघुनन्दन ।

श्रृणु तानि विचित्राणि चेत्योन्मुखचिदात्मनः ।। ३

जीवनाच्चेतनाज्जीवो जीव इत्येव कथ्यते ।

चेत्योन्मुखतया चित्तं चिदित्येव निगद्यते ।। ४

इदमित्थमिति स्पष्टबोधाद्बुद्धिरिहोच्यते ।

कल्पनान्मननज्ञत्वान्मन इत्यभिधीयते ।। ५

अस्मीति प्रत्ययादन्तरहंकारश्च कथ्यते ।

चेतनाढ्यमृतं चित्तमिति शास्त्रविचारिभिः ।। ६

प्रौढसंकल्पजालात्स पुर्यष्टकमिति स्मृतम् ।

संसृतेः प्रकृतत्वेन प्राथम्यात्प्रकृतिः स्मृता ।। ७

बोधादविद्यमानत्वादविद्येत्युच्यते बुधैः ।

इत्यादिकलनस्यास्य नामानि कथितानि ते ।। ८

एतत्कलनमाद्यन्तमनाकारमनामयम् ।

आतिवाहिकदेहोक्त्या समुदाह्रियते बुधैः ।। ९

इत्येवं स्वप्नसंकल्पपुरवत्त्रिजगद्भ्रमः ।

भात्यर्थकार्यप्यवपुः शून्यमप्रतिघात्मकम् ।। १०

इत्यातिवाहिकः प्रोक्तो देहो देहभृतां वर ।

चिन्नभश्चित्तदेहोऽसौ शून्य आकाशतोपि च ।। ११

नास्तमेति न चोदेति जगत्यामोक्षसंविदः ।

चतुर्दशविधस्यैका भूतसर्गस्य चित्तभूः ।। १२

अत्र संसारलक्षाणि भविष्यन्ति भवन्ति च ।

भूतानि च फलानीव यथा कालव्यवस्थया ।। १३

एष चित्तमयो देहो जगन्त्यन्तर्बहिस्त्वपि ।

प्रतिबिम्बमिवादर्शः शून्य एव नभो यथा ।। १४

महाकल्पस्य पर्यन्ते सर्वनाशे स्थिरे स्थिते ।

महाशून्यपदे प्रौढे ब्रह्मात्मनि निरामये ।। १५

स्वतश्चितिघनोऽचित्त्वाच्चिद्भानमिदमात्मनः ।

आतिवाहिकदेहाभं क्रमेणानेन चेतति ।। १६

स आतिवाहिको देहस्तदालोकप्रवर्तितः ।

कैश्चिद्ब्रह्मेति कथितः स्मृतः कैश्चिद्विराडिति ।। १७

कश्चित्सनातनाभिख्यः कश्चिन्नारायणाभिधः ।

कश्चिदीश इति ख्यातः कश्चिदुक्तः प्रजापतिः ।। १८

काकतालीयवद्भाताः पञ्च स्वेन्द्रियसंविदः ।

यत्र यत्र यथा तेषां स्थितास्तत्र तथा स्थिताः ।। १९

एवमत्यन्तवितते संपन्ने दृश्यविभ्रमे ।

न किंचिदपि संपन्नं सर्वशून्यं ततं यतः ।। २०

अनादिमत्परं ब्रह्म न सद्यन्नासदुच्यते ।

तदेवेदमनाद्यन्तं तथास्थितमवेदनम् ।। २१

आतिवाहिकदेहस्य तस्यानुभवतः स्वयम् ।

याति व्यसनिनः स्वप्नः कान्तेव परिपुष्टताम् ।। २२

शून्योऽप्यनाकृतिरपि घटाकारोऽनुभूयते ।

स्वप्नसंकल्पयोः स्वस्य देहस्य जगतो यथा ।। २३

भवत्यर्थकरोऽत्युच्चैस्तच्चित्खस्वप्नवस्तुवत् ।

आकाशात्मक एवोग्रः पदार्थ इव भासते ।। २४

आतिवाहिकदेहोऽसौ स्वतोऽनुभवति क्रमात् ।

अनाकारोपि शून्योपि स्वप्नाभोऽसन्नपि स्थितः ।। २५

चेतत्यस्थिगणः स्थूलं कराद्यवयवावलिम् ।

त्रिकलोमशिरास्नायुसंनिवेशतया स्थितम् ।। २६

जन्मकर्मेहितस्थानं परिणामवयःस्थितम् ।

देशकालक्रमाभोगभावार्थायोद्भवभ्रमम् ।। २७

जरामरणमाधानदशदिङ्मण्डलक्रमम् ।

ज्ञानज्ञेयज्ञातृभावमादिमध्यान्तवेदनम् ।। २८

क्षितिजलगगनदिवाकर-

जनताव्यवहारनगरशिखरात्मा ।

स्वाधाराधेयमयं

पश्यति वपुषः पुरातनः पुरुषः ।। २९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० नि० उ० जीवरूपवर्णनं नामाष्टाशीत्यधिकशततमः सर्गः ।। १८८ ।।